# Shri Krishnaprokta Krishnanarayana Stuti

# શ્રીકૃષ્ણપ્રોક્તા કૃષ્ણનારાયણસ્તુતિઃ

## Document Information

Text title : Shri Krishnaprokta Krishnanarayana Stuti

File name : kRRiShNaproktAkRRiShNanArAyaNastutiH.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, stuti

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 40/38-112||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# શ્રીકૃષ્ણપ્રોક્તા કૃષ્ણનારાયણસ્તુતિઃ

ભજધ્વં ભાવતો ભક્ત્યા શાશ્વતાલયદો યતઃ ।
પ્રપદ્યે પરમેશાનં તં હ્યજં વૈષ્ણવપ્રિયમ્ ॥ ૫૩॥

પરબ્રહ્મ મહાત્માનં વિશ્વસ્ય જગતઃ પતિમ્ ।
નમસ્તસ્મૈ દેવદૈત્યેશ્વરમુક્તાદિસેવિને ॥ ૫૪॥

સર્વાક્ષાય સર્વવ્યાપ્તાત્મનેઽન્તર્યામિણે નમઃ ।
ગાયન્તિ યં ગાયત્રિણોઽર્ચયન્ત્યેનં સમર્પિતાઃ ॥ ૫૫॥

યત્ર સર્વં કારણં ચ કાર્યં ક્રિયા ચ સાધનમ્ ।
દૈવતં સદસચ્ચાપિ નમસ્તસ્મૈ વિલાસિને ॥ ૫૬॥

નમઃ શાન્તાય વરિણે શઙ્ખચક્રધ્વજાબ્જિને ।
શૂલિને શાર્ઙ્ગિણે ચાપિ વજ્રિણે શરિણે નમઃ ॥ ૫૭॥

સ્વસ્તિમતે મીનવતે નમસ્તે પ્રભવિષ્ણવે ।
નમોઽસ્ત્વપ્રતિરૂપાય સ્વરૂપધ્વજધારિણે ॥ ૫૮॥

નમો નાનાભિરામાય નમઃ પટુતરાય ચ ।
નમઃ સાઙ્ખ્યપ્રવક્ત્રે તે યોગવક્ત્રે ચ તે નમઃ ॥ ૫૯॥

નમઃ શ્રુતિપ્રવક્ત્રે તે ન્યાયવક્ત્રે નમો નમઃ ।
નમો મુક્તિપ્રવક્ત્રે તે નમઃ શિક્ષાપ્રદાય ચ ॥ ૬૦॥

નમો મીમાંસનવક્ત્રે નમોઽમૃતપ્રદાય ચ ।
નમો હિરણ્યવપુષે નમશ્ચમ્પકવર્ચસે ॥ ૬૧॥

નમઃ સ્તુત્યાય મન્ત્રાય સર્વભૂતશરીરિણે ।
નમો હોત્રે નમઃ શીલવ્રતસ્થાયાઽતિરૂપિણે ॥ ૬૨॥

નમો દીર્ઘાક્ષિણે તુભ્યં સર્વકામપ્રદાયિને ।
નભશ્ચાન્તરનેત્રાય સર્વનેત્રાય તે નમઃ ॥ ૬૩॥

ભેદાઽભેદપ્રભિન્નાય નમસ્તે વ્યતિરેકિણે ।
છાયાતપનરૂપાય શાન્તસત્ત્વાય તે નમઃ ॥ ૬૪॥

યજ્ઞભાગપ્રિયાયૈકમૂર્તયે બ્રહ્મણે નમઃ ।
પઞ્ચાલપુત્રીરક્ષાય ભગુપુત્રીપ્રવાહિને ॥ ૬૫॥

અનરણ્યસુતેશાય નમો નારાયણીશિને ।
અન્નદાયાઽન્નપતયે કોશાત્મકાય તે નમઃ ॥ ૬૬॥

બાલાનુરૂપગોત્રે ચ બાલલીલાવિલાસિને ।
નમો બાલાય વૃદ્ધાય મઞ્જુકેશાય તે નમઃ ॥ ૬૭॥

નમઃ ષટ્કર્મતુષ્ટાય સહસ્રાભરણાય ચ ।
ધર્માર્થકામમોક્ષાણામાશ્રયાય ચ તે નમઃ ॥ ૬૮॥

નમોઽનન્તગુણૈશ્વર્યવિભૂત્યાશ્રયિણે નમઃ ।
મેઘશોભાય ચન્દ્રાર્કતારાપ્રભાય તે નમઃ ॥ ૬૯॥

ત્વમન્નમન્નભોક્તા ચ પક્વભુક્ પાવનોઽનલઃ ।
વારિ ત્વં ત્વં તથાતૃપ્તિઃ સુખમાનન્દ તે નમઃ ॥ ૭૦॥

જરાયુજાઽણ્ડજાશ્ચાપિ સ્વેદોદ્ભિજ્જાસ્ત્વયા કૃતાઃ ।
ત્વમેવ ચાવતારેશ ભૂતગ્રામશ્ચતુર્વિધઃ ॥ ૭૧॥

સ્રષ્ટા ચરાચરસ્યાઽસ્ય પાતા હન્તા ત્વમેવ હ ।
ત્વામાહુર્બ્રહ્મ વિદ્વાંસઃ પરં બ્રહ્મવિદાં ગતિઃ ॥ ૭૨॥

મનસઃ પરમં જ્યોતિર્જ્યોતિસ્ત્વં જ્યોતિષામપિ ।
હંસો વૃક્ષો મધુકરઃ પ્રાહુસ્ત્વાં બ્રહ્મવાદિનઃ ॥ ૭૩॥

યજ્ઞેષ્ટકૃત્ ફલનરત્વં ત્વામાહુર્મુનયસ્તથા ।
પઠ્યસે સ્તુતિભિર્નિત્યં વેદોપનિષદાં ગણૈઃ ॥ ૭૪॥

નરા નાર્યઃ સ્થાવરા જઙ્ગમાસ્તિર્યઞ્ચ ઇત્યપિ ।
ત્વમેવ વિદ્યસે કૃષ્ણનારાયણ જગત્પ્રભો ॥ ૭૫॥

ત્વમેવ મેઘસઙ્ઘાશ્ચ વિદ્યુતોઽશનિગર્જિતમ્ ।
સંવત્સરસ્ત્વમૃતવો માસો માસાર્ધમેવ ચ ॥ ૭૬॥

યુગાનિમેષાઃ કાષ્ઠાશ્ચ નક્ષત્રાણિ ગ્રહાસ્તથા ।
ત્વં શરી ત્વં ગદી ચક્રી ખડ્ગી વજ્રી શરાસની ॥ ૭૭॥

છેત્તા ભેત્તા પ્રહર્તાઽસિ મન્તા નેતા સનાતનઃ ।
સમુદ્રાઃ સરિતઃ શૈલા વૃક્ષાઃ સરાંસિ ભૂસ્તરાઃ ॥ ૭૮॥

લતાતૃણૌષધિવલ્લીપશવો મૃગપક્ષિણઃ ।
પૃથુકર્મગુણારમ્ભઃ કાલઃ પુષ્પફલોદયઃ ॥ ૭૯॥

મધ્યં બીજં ચાઽઙ્કુરં ચ પત્રં કાણ્ડં ચ ગ્રન્થિકા ।
નાલં પુષ્પં ફલં ચાપિ રસો ગન્ધસ્ત્વમેવ ચ ॥ ૮૦॥

પિષ્ટં મિષ્ટં સદેષ્ટં ચ ત્વમેવ પરમેશ્વર ।
પવિત્રં ચ પવિત્રાણાં મઙ્ગલાનાં ચ મઙ્ગલમ્ ॥ ૮૧॥

ઉદયાનામુદયાગ્ર્યં ત્વમેવ પરમા ગતિઃ ।
પ્રાણા નિમેષા જૃમ્ભશ્ચ ક્ષુતં ચાઽભ્યાહતિસ્તથા ॥ ૮૨॥

બ્રહ્મકાલયમાગ્નીનાં શાસ્તા બોધયિતા ભવાન્ ।
ચનુર્યુગશ્ચતુર્વેદશ્ચાતુર્હોત્રપ્રવર્તકઃ ॥ ૮૩॥

ચાતુરાશ્રમ્યનેતા ચ ચાતુર્વર્ણ્યકરસ્તથા ।
પ્રશિલ્પી ગણકો માતા સર્વશિલ્પપ્રવર્તકઃ ॥ ૮૪॥

સ્વાહા સ્વધા વષટ્કારો નમસ્કારઃ સ્તુતિસ્તથા ।
પ્રાર્થના પ્રાર્થનીયં ચ ત્વમેવ તે નમો નમઃ ॥ ૮૫॥

ગૂઢવ્રતો ગુહ્યતપાસ્તારકો ભૂમિસન્ધરઃ ।
ધાતા વિધાતા સન્ધાતા ત્વમેવ તે નમો નમઃ ॥ ૮૬॥

બ્રહ્મા શમ્ભુસ્તથા વિષ્ણુર્વિરાડ્ભૂમા ત્વમેવ ચ ।
તપઃ સત્યં બ્રહ્મચર્યમાર્જવં ત્વં પ્રતોષણમ્ ॥ ૮૭॥

ભૂર્ભુવઃ સ્વં જીવસૃષ્ટિરીશસૃષ્ટિસ્ત્વમેવ ચ ।
બ્રહ્મસૃષ્ટિઃ ઋતં દીક્ષા દમનં ત્વં જનાર્દનઃ ॥ ૮૮॥

કાન્તઃ પ્રિયઃ પતિઃ સ્વામી નારાયણસ્ત્વમેવ ચ ।
બિન્દુર્નાદો ધ્વનિર્બ્રહ્મ વિમર્શઃ સ્ફોટ ઇત્યપિ ॥ ૮૯॥

પશ્યન્તી ચ પરા મધ્યા વિશિષ્ટા વાક્ ત્વમેવ ચ ।
ગૌર્ભૂમિર્બ્રાહ્મભક્તશ્ચ સાધુઃ સતી ચ કિઙ્કરી ॥ ૯૦॥

વશ્યઃ સર્વં ત્વમેવાઽઽસ્સે ત્વાં વિના નાસ્તિ નાસ્ત્યપિ ।

શશાઙ્કાનલશીતોષ્ણક્ષુત્તૃષાશ્ચ જરામયાઃ ॥ ૯૧॥

આધયો વ્યાધયઃ શાન્તિર્ભેષજં ત્વં જનાર્દન ।
સોમપાસ્ત્વં ચ માધુર્યં મરુત્પતિર્જગત્પતિઃ ॥ ૯૨॥

અમૃતાશી જગન્નાથાઃ કુઙ્કુમેશસ્ત્વમેવ ચ ।
અક્ષતેશો ગણેશશ્ચ મુક્તેશસ્ત્વં પરેશ્વરઃ ॥ ૯૩॥

વિષાગ્નિપાઃ સોમપાશ્ચ ક્ષીરપા નવનીતપાઃ ।
આજ્યપા મધુપાઃ સર્વભોક્તા ત્વં ચ પિતામહઃ ॥ ૯૪॥

હિરણ્યરેતાઃ પુરુષશ્રેષ્ઠસ્ત્વમેવ ચૈકલઃ ।
ત્વં સ્ત્રીપુમાન્ ત્વં તૃતીયો ભાવદ્વયવિવર્જિતઃ ॥ ૯૫॥

ભાવત્રયાતિગશ્ચાપિ ભાવત્રયે પ્રવર્તસે ।
બાલો યુવા સ્થવિરશ્ચ જીર્ણદંષ્ટ્રોઽસિ વિશ્વકૃત્ ॥ ૯૬॥

ચન્દ્રાદિત્યૌ ચક્ષુષી તે જિહ્વા તે ચ સરસ્વતી ।
અહોરાત્રે નિમિષોભે આત્માનસ્તે ગૃહાલયાઃ ॥ ૯૭॥

ન બ્રહ્મા ન શિવો વિષ્ણુઃ પૌરાણા ઋષયો ન તે ।
માહાત્મ્યં વેદિતું શક્તા યાથાતથ્યેન બાલક ॥ ૯૮॥

પુંસામીશેશ્વરાણાં મુક્તાનાં કોટ્યર્બુદાનિ ચ ।
તિષ્ઠસે ત્વં સમાવૃત્ય ચાન્તર્બહિસ્ત્વમેવ સઃ ॥ ૯૯॥

મહતસ્તમસઃ પારેઽક્ષરસ્યાઽપિ પરે સદા ।
પરે ધામ્નિ પરેશસ્ત્વં રાજસે સોઽત્ર મૂર્તિમાન્ ॥ ૧૦૦॥

યં વિનિદ્રા જિતપ્રાણાઃ સત્ત્વસ્થા બ્રહ્મવર્તિનઃ ।
પરં પશ્યન્તિ યુઞ્જાનાસ્તસ્મૈ યોગાત્મને નમઃ ॥ ૧૦૧॥

યા યા મૂર્તયઃ સૂક્ષ્માસ્તે શક્યા દર્શયિતું ન તાઃ ।
તાભ્યઃ સર્વાભ્ય એવાઽત્ર ત્વદ્રૂપાભ્યો નમો નમઃ ॥ ૧૦૨॥

ભક્તાનુકમ્પી ભગવાન્ ભક્તેષુ વર્તસે સદા ।
કેશા મેઘા યસ્ય નાડ્યો નદ્યઃ કુક્ષૌ મહાબ્ધયઃ ॥ ૧૦૩॥

શયાનાય જલે હૈમે તપસ્યતે ચ તે નમઃ ।
યેઽઙ્ગુષ્ઠમાત્રાઃ પુરુષાશ્ચિદઃ સ્થાવરજઙ્ગમાઃ ॥ ૧૦૪॥

યે નદીષુ સમુદ્રેષુ પર્વતેષુ ગુહાસુ ચ ।
વૃક્ષમૂલેષુ ગોષ્ઠેષુ કાન્તારગહનેષુ ચ ॥ ૧૦૫॥

ચતુષ્પથેષુ રથ્યાસુ ચત્વરેષુ સભાસુ ચ ।
હસ્ત્યશ્વરથશાલાસુ જીર્ણોદ્યાનાલયેષુ ચ ॥ ૧૦૬॥

યેઽપિ પઞ્ચસુ ભૂતેષુ દિશાસુ વિદિશાસુ ચ ।
ચન્દ્રે સૂર્યે સત્યલોકે વૈકુણ્ઠાખ્યચતુષ્ટયે ॥ ૧૦૭॥

રસાતલગતા યે ચ યે ચ તસ્માત્ પરઙ્ગતાઃ ।
તવ ભક્તાસ્તવ દાસાઃ કિઙ્કરાસ્તવ કેશવ ॥ ૧૦૮॥

દાસ્યઃ સત્યસ્તવ ભક્તાઃ કિઙ્કર્યસ્તવ માધવ ।
નમસ્તેભ્યો નમસ્તાભ્ય ઉભાભ્યાં ચ નમોઽચ્યુત ॥ ૧૦૯॥

યેષાં ન વિદ્યતે સઙ્ખ્યાઃ પ્રમાણં રૂપમેવ ચ ।
અસઙ્ખ્યાસ્તે મુક્તગણા નમસ્તેભ્યોઽસ્તુ નિત્યશઃ ॥ ૧૧૦॥

પ્રસીદ બાલરૂપ ત્વં સ્વકં ભાવં પ્રદર્શય ।
ત્વયિ નો હૃદયાન્યત્ર ભવન્તુ સત્કથાફલમ્ ॥ ૧૧૧॥

ઇત્યેવં રાધિકે! તેન સ્તુતઃ કૃષ્ણનરાયણઃ ।
કથારમ્ભે પ્રસન્નઃ સન્નાત્મનો દર્શનં દદૌ ॥ ૧૧૨॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૪૦-અધ્યાયાન્તર્ગતં
શ્રીકૃષ્ણપ્રોક્તા કૃષ્ણનારાયણસ્તુતિઃ સમાપ્તા ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૪૦/૩૮-૧૧૨॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 40/38-112..

Proofread by PSA Easwaran

*Shri Krishnaproktа Krishnanarayana Stuti*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*